This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८६५३

॥आत्मषट्कप्रारंभः॥

Accession No:- ~~7853~~ M841
Title:- आत्मषट्कम्.
पत्र - (8)

KKSU LIBRARY
RAMTEK
441 106
M-841
Dist Nagpur

Checked 2012

(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२स

१ श्रीगणेशायनमः॥ॐभूमिमुपस्पृशेदश्नुइशानमइशानमऋषिभ्योमंत्रकृद्भ्योमंत्रपतिभ्योनमोवोअस्तु
देवेभ्यः शिवा नः शंतमाभवसुमृळीकासरस्वतीमातेव्योमसंदृशि॥भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्ष
भिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥शंनइंद्राग्नीभवतामवोभिःशंनइंद्राव
रुणारातहव्या॥शमिंद्रासोमासुवितायशंयोःशंनइंद्रापूषणावाजसातौ॥स्तुषेजनंसुव्रतंनव्यसीभि १
र्गीर्भिर्मित्रावरुणासुम्नयंता॥तआगमंतुतइहश्रुवंतुसुक्षत्रासोवरुणोमित्रोअग्निः॥कयानश्चि

ना३

ना २ मयेव्रतपाअसिदेवआमर्त्येष्वा॥त्वंयज्ञेष्वीड्यः॥शंनोमित्रःशंवरुणःशंनोभवत्वर्यमा॥शंनइंद्रोबृह
स्पतिःशंनोविष्णुरुरुक्रमः॥वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावीर्मएधिवेदस्यमआ
णीस्थःश्रुतंमेमाप्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुत
द्वक्तारमवतुअवतुमामवतुवक्तारमवतुवक्तारं॥ॐशांतिःशांतिःशांतिः॥आत्मावाइदमेकएवाग्र २
आसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृजतअंभोमरीचीर्मरमापोदोंभः

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथपु० उत्त०

त्र आभुवद्गृतीसदावृधःसखा॥कयानश्चित्रआभुवत्॥कस्त्वासत्योमदानांमंहिष्ठो मत्सदंधसः॥दृल्हाचि
दारुजेवसु॥अभीषुणःसखीनामविताजरितॄणां॥शतंभवास्यूतिभिः॥स्योनापृथिविभवानृक्षरानिवेश
नी॥यच्छानःशर्मसप्रथः॥उद्दितःशुक्रियंदधे॥तमहमात्मनिदधे॥अन्नंमामेतिद्रियं॥मयिश्रीर्मयियशः॥
सर्वःसप्राणःसचरुः॥उत्तिष्ठाम्यनुमाश्रीः॥उत्तिष्ठत्वनुमायंतुदेवताः॥अदब्धंचक्षुरिषितंमनः॥सूर्योज्यो
तिषां॥श्रेष्ठोदीक्षेमामाहिंसीः॥तच्चक्षुर्देवहितंशुक्रमुच्चरत्॥पश्येमशरदःशतंजीवेमशरदःशतं॥व

परेणाद्दिवंद्यौःप्रतिष्ठांतरिक्षंमरीचयःपृथिवीमरोयाअधस्तात्ताआपःसईक्षतेमेनुलोकाल्लोकपालान्नुस
जाइतिसोद्भ्यएवपुरुषंसमुद्धृत्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्यमुखंनिरभिद्यतयथांडंमुखाद्वाग्वा
चोग्निर्नासिकेनिरभिद्येतांनासिकाभ्यांप्राणःप्राणाद्वायुरक्षिणीनिरभिद्येतामक्षीभ्यांचक्षुश्चक्षुषआ
दित्यःकर्णौनिरभिद्येतांकर्णाभ्यांश्रोत्रंश्रोत्राद्दिशस्त्वङ्निरभिद्यतत्वचोलोमानिलोमभ्यओषधिवनस
तयोहृदयंनिरभिद्यतहृदयान्मनोमनसश्चंद्रमानाभिर्निरभिद्यतनाभ्याअपानोपानान्मृत्युःशिश्नंनिर

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ भिद्यत शिश्नाद्रेतो रेतस आपः॥२४॥ ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतंस्तमशनापिपासाभ्याम
न्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ताभ्यो गामानयत्ता अब्रुवन्न वै नो
यमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति पु
रुषो वाव सुकृतं ता अब्रवीद्यथायतनं प्रविशतेत्यग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदा श ३
दित्यश्चक्षुर्भूत्वाक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चं

श २ता

द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशंस्तमशनापिपासे अब्रू
तामावाभ्यामभिप्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति तस्माद्यस्यै कस्यै
च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः॥२॥ स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः
सृजा इति सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो मूर्तिरजायत या वै सा मूर्तिरजायतान्नं वै तत्तदेनत्सृष्टं पराङ्त्य
जिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचा ग्रहीतुं स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत्स त्वा

(५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० ४ णनाजिघृक्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसयद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्त
न्नाशक्नोच्चक्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वाहैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोत्तच्छ्रोत्रे
णाग्रहीतुंसयद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वाहैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयद्धैनत्व
चाग्रहैष्यत्स्पृष्ट्वाहैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहैष्यद्ध्या ४
त्वाहैवान्नमत्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्यहैवान्न

२ त

मत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषोन्नस्यग्रहोयद्वायुरन्नायुर्वाएषयद्वायुःसईक्षतकथंन्विदंमदृ
तेस्यादितिसईक्षतकतरेणप्रपद्याइतिसईक्षतयदिवाचाभिव्याहृतंयदिप्राणेनाभिप्राणितंयदिचक्षुषादृ
ष्टंयदिश्रोत्रेणश्रुतंयदित्वचास्पृष्टंयदिमनसाध्यातंयद्यपानेनाभ्यपानितंयदिशिश्नेनविसृष्टमथ
कोहमितिसएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतसैषाविदृतिर्नामद्वास्तदेतन्नांदनंतस्यत्रयआवस
थास्त्रयःस्वप्नाअयमावसथोयमावसथोयमावसथइतिसजातोभूतान्यभिव्यैख्यत्किमिहान्यंवावदि

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ख

आ० ५ षदिति स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती ३ तस्मादिदंद्रो नामे इदंद्रो ह वै नाम तमिदंद्रं संतमिं
द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥२३॥ इति चतुर्थोध्यायः॥ अपक्रामं
तु गर्भिण्यः पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजः संभूतमात्मन्येवात्मा
नं बिभर्ति तद्यदा स्त्रियां सिंचत्यथैनज्जनयति तदस्य प्रथमं जन्म तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमं ५
गं तथा तस्मादेनां न हिनस्ति सास्यैतमात्मानमत्र गतं भावयति सा भावयित्री भावयितव्या भवति तं स्त्री गर्भं

२त य

४

बिभर्ति सोग्र एव कुमारं जन्मनोग्रेधि भावयति स यत्कुमारं जन्मनोग्रेधि भावयत्यात्मानमेव तद्भावयत्येषां लो
कानां संतत्या एवं संतता हीमे लोकास्तदस्य द्वितीयं जन्म सोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयतेथास्या
यमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म तदुक्तमृषिणा गर्भे
नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ॥ शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति
गर्भ एवैतच्छयानो वामदेव एवमुवाच स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिं स्वर्गे लोके सर्वा

(6)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ०
६

न्कामानाप्त्वामृतः समभवत्समभवत् ॥२॥ यथास्थानं सुगर्भिण्यः ॥ इति पंचमोध्यायः ॥ ॥ कोयमात्मेति वयमु
पास्महे कतरः स आत्मा येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा
स्वादु चास्वादु च विजानाति यदेतद्धृदयं मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा
जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवंत्येष ब्रह्मैष इंद्र ए ६
ष प्रजापतिरेते सर्वे देवा इमानि च पंच महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमि

श्राणीव बीजानीतराणि चेतराणि चांडजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो
यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रति
ष्ठा प्रज्ञानं ब्रह्म ॥ स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिं स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभव
त्समभवत् ॥२॥ इति षष्ठोध्यायः ॥ ॥ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य
म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ॰
१

बतु तद्वक्तारं मवत्ववतु मामवतु वक्तारमवतु वक्तारं ॥ स्व ॥ इति सप्तमोध्यायः ॥ ॥ आत्मषट्क समाप्तः ॥ ॥

१

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 10:52
,TRANSFERRED=2020/10/22 at 10:53:52
,PAGES=8
,TYPE=STD
,NAME=S0004347
,Book Name=M-841-AATMSHATKAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection